International Journal of Sanskrit Research 2023; 9(2): 258-260

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(2): 258-260
© 2023 IJSR
www.anantaajournal.com
Received: 18-01-2023
Accepted: 23-02-2023

**राजकुमार झा**
शोधछात्र, कौमारभृत्य बाल रोग आयुर्वेद संकाय, चिकित्सा विज्ञान संस्थान, काशी हिंदू विश्वविद्यालय, वाराणसी, उत्तर प्रदेश, भारत

**Corresponding Author:**
**राजकुमार झा**
शोधछात्र, कौमारभृत्य बाल रोग आयुर्वेद संकाय, चिकित्सा विज्ञान संस्थान, काशी हिंदू विश्वविद्यालय, वाराणसी, उत्तर प्रदेश, भारत

# संस्कारेषु नामकरण संस्कारस्य वैज्ञानिक महत्वम्

## राजकुमार झा

### प्रस्तावना

अस्माकं भारतीयपम्परायां संस्कारस्य वैशिष्टं स्थानम लभते तेन विना जिवनम् जिवितुम नैव शक्यते यतो हि “संस्कारो ही गुणान्तराधानम उच्यते” जीवने कदाचित गुणानाम आराधनं क्रियते तथा च कदाचित अवगुणाम् अपहृयते सस्कार शब्द: सम् उपसर्ग पूर्वकात् 'कृ' धातो: 'घञ्' प्रत्यये कृत्वा संस्कार शब्द: निष्पद्यते एवञ्च सम् उपसर्गस्यार्थ: संयोग: (parochial) संकीर्ण (Narrow) कृ धातो: कर्तुम् अर्थे: (to do) इत्यस्मिन अर्थे: "घञ्' प्रत्यय "भावे" ( पा० सू० ) घञ् (अ) भाव अर्थे कानिचन स्थाने कारकार्थेऽपि भवति यतो हि चित्तं दारयन्ति विद्रावयन्तीति द्वाराः । जरयति नाशयति कुलमिति = जारः । संस्कार शब्दस्य नैका: अर्था: दृश्यते शुद्धि, अलंकार, अर्था: भवन्ति शास्त्रमेव चक्षुः परमपुमर्थताधिगमाय मनः शरीर बुद्धि विसर्गसृष्टानाम प्रकाशानां काममोहविभ्रान्तचेतसामयोगि- नामस्माकम् । विनिवर्त्तन्ते शास्त्रैरविद्यासंशयविपर्ययाः । शास्त्रेषु धर्मव्युत्पादकतया मन्वाद्युपनिबद्धं स्मृतिशास्त्रं'[1] धर्मशास्त्रापराभिधमावहति स्वस्वातन्त्र्यं चतुर्दशविद्या स्थानेषु[2] चान्यतमत्वेनोपदर्शनात् । संस्कारश्च “शब्दानां साधनप्रकारः” इति शब्दिकाः, “शास्त्राभ्यासजन्यव्युत्पत्तिः” इत्यलङ्कारिकाः, “संस्कारत्वजातिमान् गुणः” इत्याक्षपादाः “सतो गुणान्तराधानामत्मकः प्रतियन्तः” चेति धर्मज्ञाः । व्रीह्यादेश्च यज्ञाङ्गताप्रतिपादनाय वैदिकमार्गेण प्रोक्षणादिसंस्कारः । प्रोक्षणादिजन्य “संस्कारस्य पुंधर्मतेति संस्कारः पुंस एवेष्ट: प्रोक्षणाभ्युक्षणादिभिः[3] ” इति न्यायकुसुमाञ्जलिकारवचनप्रामाण्येन नोऽवबोधात् । “संस्कारो नाम द्रव्यधर्मः” इति मीमांसका वदन्ति यज्ञाङ्गव्रीहिषु तत्सत्त्वात् “प्रोक्षिता एवं व्रीहयः पुरोडाशाय कल्प्यन्ते ना प्रोक्षिताः” इत्युभ्युपगमात् । न अस्य मीमांसक सिद्धान्तस्य युक्तता देवता विशेषोद्देशेनवह्नौ समन्त्राणां प्रदत्तं हविराहुतीनां “पुरुषे संस्कारविधानेन वह्नौ देवतायां वा संस्कारायोगात्” । तस्माद् व्रीह्युद्देशेन प्रयुज्यमान प्रोक्षणादि जन्य संस्कारस्य पुरुष निष्ठता न तु व्रीहिवृत्तितेति । न च व्रीहीन् प्रोक्षति इत्यादि स्थने व्रीह्यादे: संस्कारतया निर्देशात् प्रोक्षण क्रिया जन्य संस्कार रूपफलाश्रयतया व्रीहौ संस्कार्य कर्मता, क्रिया जन्यफल शालित्वेन कर्मत्व लक्षण उपगमात दिति वाच्यम्, तत्र प्रोक्षणादि जनित जलसंयोगात्मक फलाश्रतया तादृशव्यपदेशात् ।

वस्तुतः समुपसर्गात् कृञो घञि निष्पन्नोऽयं संस्कार आत्मशरीरान्यतरनिष्ठो हीनाङ्कपूरको दोष अपमार्जन करोति- शयाधायको विहित क्रियाजन्योऽतिशयविशेषः । अन्यतरत्वञ्च भेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वम् । तथा चात्मशरीरान्यतरत्वकथनेनात्मशरीरयो मध्ये यस्य कस्याप्येकस्येत्यर्थो भाव्यः ।

शरीर संस्कार: स्मृतिसिद्धः "वैदिकैः कर्मभिः पुण्यैः निषेकादिर्द्विजन्मनाम् । चात्मशरीरान्यतरत्वकथनेनात्मशरीरयो मध्ये यस्य कस्याप्येकस्येत्यर्थो भाव्यः। शररीर संस्कार: स्मृतिसिद्धः

"वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च " ।।[4] " इति मनु सिद्धान्त सिद्धत्वात् ।

आत्म संस्कारोऽपि प्रामाणिक:

"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः " ॥[5] इति

मनुभारत्यां तन्ववच्छिन्नस्यात्मनः कुल्लूकैरुपपादितत्वात् । अत्र कर्मसहकृतब्रह्मज्ञानेन मोक्षाधिगम इत्यभिसन्धिः

"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्माभ्यां प्राप्यते ब्रह्मशाश्वतम्" ।। इति स्मृतिप्रामाण्यात् ।

अष्टचत्वारिंशत् संस्काराः समासतो ब्राह्मदैवभेदेन द्वैविध्यं संस्काराणां हारीतकीर्त्तनात् । तत्र गर्भाधानादिस्मात्त

सीमन्तो जातकर्म च ।
नामक्रिया ब्राह्मः पाकयज्ञहविर्यज्ञादिसंस्कारो दैवः ।
गर्भाधानं पुंसवनं निष्क्रमोऽन्नप्राशनं वपनक्रिया ||
कर्णवेधो व्रतादेशो वेदरम्भक्रियाविधिः ।
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ।।

त्रेताग्निसङ्ग्रहश्चेति संस्काराः षोडश स्मृताः । इति व्यासस्मृतौ प्रामुख्यं भजतां स्मार्त्त संस्काराणां मननपूर्वकं चिन्तनेन भागचतुष्टेयेन प्राग्जन्मशैशवशैक्षणिकगृहस्थप्रवेशसंस्कारात्मकेन सम्पन्नता।

(क) व्यापदिश्यन्ते गर्भाधान पुंसवन सीमन्तोन्नयन संस्काराः प्राग्जन्मसंस्कारनाम्ना जन्मनः प्राक्कालावच्छेदेन कर्त्तव्यत्वेन व्यपदेशात् । गर्भाधानसंस्कारः शुक्रशोणितसम्भवो गर्भ आधीयते येन संस्कारेण स इति । "सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूतम्"[6] इत्युपनिषद्वाचा सर्वभूतानां सारतमं रेतरिति प्रतीयते । एतादृशस्य योग्या प्रतिष्ठा केति जिज्ञासापूत्तौ "सह प्रजापतिरीक्षां चक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रिय ससृजेता सृष्ट्वाध उपास्त तस्मात् स्त्रियमध उपासीत स एवं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत। इत्यौपनिषदी वाणी चकास्ति प्रत्युत्तरतया । कल्प्यते च मैथुनकर्मणो वाजपेययज्ञसमता" । मैथुनस्य न पाशविकक्रियामात्रता न वा भोगार्थता, किन्तूत्तमसन्तानोत्पादार्थता वाजपेययज्ञसादृश्येन समुपलब्धेः पत्न्याश्च लक्ष्मीरूपतया पूज्यत्वात् ।
पुंसवन संस्कारो गर्भस्य द्वितीये तृतीये वा मासे । पुरा स्पन्दत इति । भ्रूणस्य स्पन्दनात् पूर्वम् । पुमान् सूयत इति व्यत्पत्त्या सन्तानस्य बुद्धिमत्ता बलवत्ता चास्य संस्कारस्याशयः । सीमन्तो न्नयनसंस्कार: सीमन्नोऽन्तः । प्रथमे गर्भे मासे षष्ठेऽष्टमे वा पुष्यादिनक्षत्रसत्त्वेऽयं संस्कारो गर्भाभिवृद्धिपरिपन्थिविनाशकः सकलसौभाग्यप्रदायकश्च ।
(ख) शैशवसंस्कारो जातकर्ममेधाजनननामकरणनिष्क्रमणान्नप्राशनचूडाकरणक र्णवेधसंज्ञकः । "प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयते । इत्येन संसूचिता जातकर्माख्यसंस्कारस्य कर्त्तव्यता पुरुषस्य नाभिच्छेदनात् प्राक् । तत्र च नवजातस्य मन्त्रोच्चारणपूर्वकं स्वर्णमधुघृतभोजनमिति सारो बोद्धव्यः ।
मन्त्रवत् प्राशनं चास्य हिरण्यमधुसर्पिषाम्"[7] ।।'
जातकर्म मातुर्नवजातशिशोश्च सुरक्षाध्यानम् । कार्या च सूतिकागृहनिर्मितिर्वास्तुविद्यानुसारिणी । मेधाजननसंस्कारो नवजातशिशोबौद्धिकविकासकामनया । भवति सुवर्णशलाकया मधुघृतादिदानम् । वैज्ञानिकं महत्त्वं सुवर्णमधुघृतेष्वप्रतिहतम् ।

**नामकरणसंस्कार**

कालविचार:
"नामधेयं दशम्यां त द्वादश्यां वास्य कारयेत् ।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते" ।[8]" इति वचसावगन्तव्यः ।

नामकरणसंस्कार: काल: दशमे दिवशे १०वा एकादशे ११ वा शतम दिवसे१००वा[9] वर्षस्य अन्तिमे ज्योतिषिणा परामर्ष द्वारा मास दिवस समयानुसारम् नामकरणं कुर्यात् । एवञ्च जातस्य नाम प्रकारद्वयं भवति नाक्षत्रिकं अभिप्रायिकं च नाक्षित्रकं नाम घोष, ( ह य व र ल य म ङ ण न झ भ घ ढ ध ज ब ग ड द) अन्तस्थ (य र ल व) उष्मस्थ (स श ष ह) वर्णानां निर्धारनेन क्रियते तस्य वर्णस्य प्रभाव: शारीरिक, मानसिक. विकासोऽपि दरिदृशयते ।
स्त्रीणां नाम्नः सुखोच्चारणयोग्यता कर्क शाब्धविविक्तता स्पष्टार्थता श्रुति मधुरता मङ्गल पूर्णता दीघेवर्णान्तताऽऽशीर्वादियुक्तता च शास्त्र सम्मतेति
स्त्रीणां सुखोद्यमक्रूरं विष्पष्टार्थं मनोहरम् ।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ।। इति मनुवचनात्प्रतीयते ।
यशोदादेवीत्यभिधाने पूर्वोक्तलक्षणं समुपपद्यते ।

**नामकरणसंस्कारस्य विधि:**

'दशमे त्वहनि सपुत्रा स्त्री सर्वगन्धौषधै गौरसर्पपलोध्र स्नाता लघ्वहतशुचिवस्त्रं परिधाय पवित्रेष्टलघुविचित्रभूषणवती च

संस्पृश्य च देवतां शिखिनः शुक्लवाससोऽव्यङ्गांश्च ब्राह्मणान् स्वस्ति वाचयित्वा कुमारमहतानां च वाससा सञ्चये प्राक्शिरसमुदशिरसं वा संवेश्य देवतापूर्वं द्विजातिभ्यः प्रणमतीत्युक्त्वा कुमारस्य पिता द्वे नामनी कारयेन्नाक्षत्रिकं नामाभिप्रायिकं च । After Swastikavachana by Brahmana, mother should sit keeping head of the child towards the east or north then father of the child prays to god and give two names to the child.- one Naksatrika (similarity to the planet of birth) and the other Abhiprayika (desired name by which the baby would be known in family or society)[10] तत्राभिप्रायिकं घोषवदाद्यन्तस्थान्तमूष्मान्तं वाऽवृद्धं त्रिपुरुषानूकमनवप्रतिष्ठितं,

'दशमे दिवसे पूर्णे विधिभिः स्वकुलोचितैः ।
कारयेत्सूतिकोत्थानं नाम बालस्य चार्चितम् ।।
बिभ्रतोऽङ्गैर्मनोहालरोचनाऽगुरुचन्दनम् ।
नक्षत्रदेवतायुक्तं बान्धवं वा समाक्षरम्' ।।[11]
'दशमे द्वादशे वाऽहि गोत्राचारैः शुभैः शुभे ।
सूतास्नानोत्सवं कुर्यात् पितापत्यस्य नाम च ।।
दिने शततमे वाख्यां पूर्णे संवत्सरेऽथवा ।
बिभ्रतोऽङ्गैर्मनोहालरोचनागरुचन्दनम् ॥
पूज्यं त्रिपुरुषानूकमादी घोषवदक्षरम् ।
अवृद्धं कृतमूष्मान्तमनरातिप्रतिष्ठितम् ।।
नक्षत्र देवतायुक्तं तदेव तु न केवलम् ।
मङ्गल्यमन्तरन्तस्थं न दुष्टं न च तद्धितम् ॥
पुंसो विसर्जनीयान्तं समवर्णां स्त्रियां पुनः ।
विषमाक्षरमक्रूरं विस्पष्टार्थं मनोरमम् ॥
सुखोद्यं दीर्घवर्णान्तमाशीर्वादभिधानवत्' ।।[12]

## उपसंहार

आधुनिक समये नामकरण संस्कारस्य अत्यन्त आवश्यक्ता दरीदृश्यते । कश्चिद वस्तो: ज्ञानम नामकरणमेव भवति । Baby regains the birth weight on 10th day after birth. Umbilical cord falls normally after 5 to 10 days but may take longer तेन शिशो: सुसंस्कार एवश्च वृद्धि विकाश्च परिलक्ष्यते । यदा दसमे दिवशे नामकरण क्रियते तदा कानिचन रोगाणा: नैव भवितुम अर्हति एवश्च नामकरण संज्ञाया द्वारा कश्चन जनानामेव ज्ञातुम शक्यते नामनिधारणे वर्णस्य प्रभावोभवत्येव एतदर्थं शात्रदृष्ट्या नामकरण कुर्यात् ॥

## संदर्भ


1. धर्मशास्त्रं तु वै स्मृति: , मनुस्मृततौ २/१०
2. पुराणतर्कमीमांसाधर्मशास्त्राङ्गमित्रिता:, या.मृ. १-३
3. न्यायकुसुमाञ्जलि :१/११
4. मनुस्मृति २/२६/
5. तत्रैव – २/२८/
6. ऐतरेयं २/१/१
7. मनुस्मृतौ २/२९
8. मनुस्मृतौ २/३३
9. चरक संहिता , शारीरस्थान ८/५०
   सुश्रुत संहिता शारीरस्थान १०/२४
   अष्टांग हृदय , उत्तरस्थान १/२२/-२३
10. IJAR ISSN t: 2394-7500
11. अं.हृ.उ. 1:22-23
12. अ.सं.उ. 1:27-30